# NCERT Solutions Class 6 Sanskrit (Deepakam)

## Chapter 11 पृथिव्यां त्रीणि रत्नानि

**वयम् अभ्यासं कुर्मः**

**१. एतानि सर्वाणि सुभाषितानि उच्चैः पठन्तु स्मरन्तु लिखन्तु च ।**

(इन सभी सुभाषितों को जोर से पढ़ो, याद करो और लिखो ।)

**२. अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन लिखन्तु ।**

(निम्नलिखित प्रश्नों के उत्तर एक पद में लिखें)

**(क) पृथिव्यां कति रत्नानि सन्ति? – ……………..**
**उत्तरम्:** त्रीणि।

**(ख) अयं निजः परो वा इति गणना केषां भवति ? – ……….**
**उत्तरम्:** लघुचेतसाम्।

**(ग) कार्याणि केन सिध्यन्ति ? – …………**
**उत्तरम्:** उद्यमेन ।

**(घ) विद्या किं ददाति ? – …………**
**उत्तरम्:** विनयम् ।

**(ङ) जननी जन्मभूमिश्च कस्मात् गरीयसी ? – ……….**
**उत्तरम्:** स्वर्गात् ।

**(च) लङ्का कीदृशी आसीत्? – ……………**
**उत्तरम्:** स्वर्णमयी।

**३. अधोलिखितानां प्रश्नानाम् एकवाक्येन उत्तराणि लिखन्तु ।**

Get More Learning Materials Here : CLICK HERE www.studentbro.in

(अधोलिखित प्रश्नों के उत्तर एक वाक्य में लिखो)

**(क) पृथिव्यां त्रीणि रत्नानि कानि सन्ति?**

**उत्तरम्:** पृथिव्यां त्रीणि रत्नानि जलम् अन्नं सुभाषितं च सन्ति ।

**(ख) उदारचरितानां भावः कः भवति ?**

**उत्तरम्:** उदारचरितानां वसुधा एव कुटुम्बकम् अस्ति ।

**(ग) मृगाः स्वयमेव कस्य मुखे न प्रविशन्ति ?**

**उत्तरम्:** मृगाः स्वयमेव सुप्तस्य सिंहस्य मुखे न प्रविशन्ति ।

**(घ) अभिवादनशीलस्य नित्यं कानि वर्धन्ते ?**

**उत्तरम्:** अभिवादनशीलस्य नित्यं चत्वारि आयुर्विद्यायशोबलं वर्धन्ते ।

**(ङ) मनुष्यः धनात् किम् आप्नोति ?**

**उत्तरम्:** मनुष्यः धनात् धर्मं प्राप्नोति ।

**(च) उत्पन्नेषु कार्येषु कीदृशं धनम् उपयोगाय न भवति ?**

**उत्तरम्:** उत्पन्नेषु कार्येषु परहस्तगतं धनम् उपयोगाय न भवति ।

**४. चित्रं दृष्ट्वा वाक्यानि रचयन्तु ।**

(चित्र देखकर वाक्यों की रचना करो)

**उदाहरणम्- <u>वृक्षः फलानि यच्छति ।</u> <u>त्वं फलानि स्वीकरोषि ।</u> <u>अहं फलानि स्वीकरोमि ।</u>**

**उत्तरम्:** (क) वृक्षः छायां यच्छति । छाया शीतला भवति । वयं छायायाम् विश्रामम् कुर्मः ।

(ख) वृक्षः कर्गदम् यच्छति । कर्गदः उपयोगाय भवति। वयम् कर्गदेषु लिखामः ।

(ग) वृक्षः काष्ठं यच्छति । काष्ठम् इन्धनाय भवति। भवननिर्माणे काष्ठस्य आवश्यकता भवति ।

(घ) वृक्षः शुद्धं वायुं यच्छति । अनेन पर्यावरणस्य शुद्धिः भवति । शुद्धेन वायुना वयं स्वस्थाः भवामः ।

(ङ) वृक्षः पुष्पाणि यच्छति । पुष्पाणि सुगन्धं प्रसारयन्ति । पुष्पाणां माला भवति ।

Get More Learning Materials Here : CLICK HERE www.studentbro.in

**५. अधोलिखितानि वाक्यानि पठित्वा 'आम्' अथवा 'न' इति लिखन्तु ।**

(अधोलिखित वाक्यों को पढ़कर 'हाँ' अथवा 'नहीं' में लिखो ।)

यथा – किं पृथिव्यां त्रीणि रत्नानि सन्ति? (आम्)

**(क) त्रीणि रत्नानि जलम् अन्नं पाषाणः च सन्ति? ............**
**उत्तरम्:** न

**(ख) किं धर्मेण सुखं प्राप्यते ? ........**
**उत्तरम्:** आम्

**(ग) किं विद्या विनयं ददाति ? ........**
**उत्तरम्:** आम्

**(घ) किम् अभिवादनशीलस्य विद्या वर्धते ? .........**
**उत्तरम्:** आम्

**(ङ) किम् उद्यमेन कार्याणि नश्यन्ति ? ............**
**उत्तरम्:** न

**(च) किं जन्मभूमि स्वर्गात् गरीयसी भवति ?**
**उत्तरम्:** आम्

**६. चित्रे दर्शितस्य नाम लिङ्गं च निर्दिशन्तु ।**

(चित्र में दर्शाए गए का नाम और लिङ्ग लिखो ।)
उत्तरम्:

**७. वलये पदानि विलिख्य सुभाषितं पूरयन्तु ।**

(घेरे में पदों को लिख कर सुभाषित पूरा करो।)
**उत्तरम्:**

Get More Learning Materials Here : CLICK HERE www.studentbro.in

**८. पट्टिकातः पदानि चित्वा निर्देशानुसार पदानि लिखन्तु ।**

(पट्टी से पदों को चुनकर निर्देशानुसार पद लिखो ।)

जननी धैर्यम् विद्या विनयः निजः पत्रम्
बुद्धिः मूलम् पराक्रमः शक्तिः धनम् उद्यमः

**(क) प्रथमान्त-पुंलिङ्गपदानि सन्ति**

**1. उद्यमः**
**2. ................**
**3. ................**
**4. ...............**

**उत्तरम्:** 1. उद्यमः

2. विनयः

3. निजः

4. पराक्रमः

**(ख) प्रथमान्त – स्त्रीलिङ्गपदानि सन्ति**

**1. वसुधा**
**2. ................**
**3. ...............**
**4. ...............**
**5. ...............**

**उत्तरम्:** 1. वसुधा

2. जननी

3. विद्या

4. बुद्धिः

5. शक्तिः

**(ग) प्रथमान्त नपुंसकलिङ्गपदानि सन्ति**

**1. साहसम्**
**2. ...................**
**3. ...................**

Get More Learning Materials Here : CLICK HERE www.studentbro.in

**4. .................**
**5. ................**
**उत्तरम्:** 1. <u>साहसम्</u>

2. <u>धैर्यम्</u>

3. <u>पत्रम्</u>

4. <u>मूलम्</u>

5. <u>धनम्</u>

**९. पाठगतानि सुभाषितानि स्मृत्वा रिक्तस्थानानि पूरयन्तु।**

(पाठ में आए सुभाषितों को याद करके रिक्तस्थानों को पूरा करें।)

**(क) पृथिव्यां त्रीणि रत्नानि ......... सुभाषितम्।**
**उत्तरम्:** पृथिव्यां त्रीणि रत्नानि जलम् अन्नम् सुभाषितम्।

**(ख) उदारचरितानां तु ........... कुटुम्बकं भवति ।**
**उत्तरम्:** उदारचरितानां तु वसुधैव कुटुम्बकं भवति ।

**(ग) उद्यमेन हि .......... सिद्ध्यन्ति ।**
**उत्तरम्:** उद्यमेन हि कार्याणि सिद्ध्यन्ति ।

**(घ) अभिवादनशीलस्य वृद्धोपसेविनः ........... वर्धन्ते ।**
**उत्तरम्:** अभिवादनशीलस्य वृद्धोपसेविनः चत्वारि आयुर्विद्या यशोबलं वर्धन्ते ।

**(ङ) उद्यमः ............. पराक्रमः ।**
**उत्तरम्:** उद्यमः साहसं धैर्यं बुद्धिः वर्त्तन्ते, तत्र देवः सहायकृत् पराक्रमः ।

**(च) विद्या ............ ददाति ।**
**उत्तरम्:** विद्या विनयं ददाति ।

**(छ) जननी जन्मभूमिश्च ........... गरीयसी भवति ।**
**उत्तरम्:** जननी जन्मभूमिश्च स्वर्गादपि गरीयसी भवति ।

Get More Learning Materials Here : CLICK HERE www.studentbro.in

**१०. चित्राणि दृष्ट्वा उचितान् श्लोकांशान् लिखन्तु ।**

(चित्र देखकर उचित श्लोकों का अंश लिखो)

**उत्तरम्:** (क) उद्यमेन हि सिध्यन्ति कार्याणि ।
(ख) पृथिव्यां त्रीणि रत्नानि जलम् अन्नम् सुभाषितम्।
(ग) जननीजन्मभूमिश्च स्वर्गादपि गरीयसी ।
(घ) पात्रत्वाद् धनम् आप्नोति ।
(ङ) उदारचरितानां तु वसुधैव कुटुम्बकम् ।

**योग्यताविस्तरः**

एतानि सुभाषितानि विविधग्रन्थेभ्य: स्वीकृतानि सन्ति ।
तेषां ग्रन्थानां परिचयः अत्र वर्णितः अस्ति, यथा-

(क) चाणक्यनीतिः – एषः एकः नीतिग्रन्थः अस्ति । अस्य रचनाकार: चाणक्यः अस्ति । अस्मिन् ग्रन्थे सूत्ररूपेण धर्म-संस्कृति-न्यायव्यवस्था – शान्ति – सुशिक्षा – इत्यादीनां विषये सुन्दरं विवरणम् अस्ति ।

(ख) मनुस्मृतिः – मनुस्मृतिः एकः प्रसिद्धः नीतिग्रन्थः धर्मग्रन्थः च अस्ति । अस्य रचनाकार: महर्षि मनुः अस्ति । अस्मिन् ग्रन्थे द्वादश अध्यायाः सन्ति । अस्मिन् ग्रन्थे संसारस्य उत्पत्तिः, धर्म, संस्कृतिः मनुष्यस्य कर्तव्यानि इत्यादीनां वर्णनम् अस्ति ।

(ग) पञ्चतन्त्रम्:- पञ्चतन्त्रं कथाग्रन्थः अस्ति । अस्य रचनाकार: पण्डितः विष्णुशर्मा अस्ति । अस्मिन् पञ्च तन्त्राणि सन्ति । मित्रभेद:, मित्रलाभः काकोलूकीयम्, लब्धप्रणाशः, अपरीक्षितकारकं च ।

(घ) हितोपदेशः – हितोपदेशस्य रचनाकार : नारायणपण्डितः अस्ति। अस्मिन् पशु-पक्षिणां कथाभिः बालानां कृते नीतिबोध: प्रस्तुतः अस्ति ।

(ङ) रामायणम् – एषः ग्रन्थः भारतीयसंस्कृतेः आदर्शस्वरूपं दर्शयति । रामायणस्य रचयिता महर्षि वाल्मीकि : अस्ति । अस्मिन् ग्रन्थे भगवतः श्रीरामस्य चरितं वर्णितम् अस्ति । एषः ग्रन्थः आदिकाव्यम् इति नाम्ना प्रसिद्धः अस्ति ।

Get More Learning Materials Here : CLICK HERE www.studentbro.in

(घ) सुभाषितरत्नभाण्डागारः – अस्मिन् ग्रन्थे सुभाषितानां संग्रह: अस्ति। विविध संस्कृतग्रन्थेभ्य: सुभाषितानि चित्वा अस्मिन् ग्रन्थे तेषां सङ्कलनं कृतम् अस्ति।

**परियोजनाकार्यम्**

**१. पाठस्य सर्वाणि सुभाषितानि बृहत् स्फोरकपत्रे सचित्रं लिखित्वा कक्षायाः भित्तौ स्थापयन्तु।**
**उत्तरम्:** स्वयेव कुर्वन्तु।

**२. सुभाषितेषु प्रयुक्तानां क्रियापदानां सूचीं कुर्वन्तु। तेषाम् आधारेण वाक्यरचनां कुर्वन्तु।**
**उत्तरम्:** सुभाषितेषु प्रयुक्तानां क्रियापदानां वाक्यरचना:-

1. भवन्ति – संस्कृते त्रीणि वचनानि भवन्ति।
2. सन्ति – अन्नम् जलं सुभाषितं च रत्नानि सन्ति।
3. सिध्यन्ति परिश्रमेण एव कार्याणि सिध्यन्ति।
4. प्रविशन्ति – मृगाः सुप्तस्य सिंहस्य मुखे न प्रविशन्ति।
5. वर्धन्ते – अभिवादनशीलस्य आयुः विद्या, यशः बलम् च वर्धन्ते।
6. ददाति – विद्या विनयम् ददाति।
7. आप्नोति – योग्य नरः जीवने सर्वसुखं आप्नोति।
8. रोचते – मह्यम् मम देशं एव रोचते।
9. यच्छन्ति – धनिकाः दरिद्रेभ्यः भोजनं यच्छन्ति।

**३. विद्या, उद्यम, अभिवादनशीलः, इत्यादिगुणाः येषु सन्ति तादृशानां पञ्चानां महापुरुषाणां जीवनपरिचयं पठन्तु लिखन्तु च।**
**उत्तरम्: 1. पण्डित जवाहरलालनेहरू महोदयः** पण्डित जवाहरलालनेहरू महोदयः स्वतन्त्र – भारतस्य प्रथमप्रधानमन्त्री आसीत्। तस्य जन्म उत्तरप्रदेशस्य प्रयागराजनगरे अभवत्। तस्य पिता मोतीलाल नेहरू माता च स्वरूपारानी आस्ताम्। सः आङ्ग्लदेशं उच्चशिक्षार्थम् अगच्छत्। स्वतन्त्रतासंग्रामे तस्य महत् योगदानम् आसीत्। स्वतन्त्रतायै सः बहुवारं कारागारम् अगच्छत्। सः कुशलः राजनीतिज्ञ: लेखक: च आसीत्। तस्य बालकान् प्रति प्रेमपूर्ण आचरणं आसीत्। एतदर्थं तस्य जन्मदिनम् अपि 'बालदिवस' इति रूपेण मन्यते।

**2. महात्मा गान्धिमहोदयः** भारतीयानाम् प्रियः नेता महात्मा गान्धिमहोदयः अस्ति। तस्य पूर्णनाम 'मोहनदास करमचन्द गाँधी' अस्ति। तस्य जन्म गुजरातराज्ये 'पोरबन्दर' इति नगरे अभवत्। तस्य माता 'पुतलीबाई', पिता 'करमचन्द गाँधी' भार्या च 'कस्तूरबा' आसन्। सः सत्ये अहिंसायां च

Get More Learning Materials Here : CLICK HERE www.studentbro.in

विश्वसिति स्म I भारतस्य स्वतन्त्रतायै सः बहुवारं कारागृहम् अगच्छत् I 'राष्ट्रपिता' महात्मा, 'बापू' इत्यादिभिः उपाधिभिः भारतीयाः तस्य सम्मानं अद्यापि कुर्वन्ति I

**3. स्वामी विवेकानन्दः** विवेकानन्दस्य नाम नरेन्द्रनाथः आसीत् I सः रामकृष्ण परमहंसस्य शिष्यः आसीत्I भारतीयानाम् दुर्दशां परतन्त्रताम् च दृष्ट्वा तस्य मनः अति खिन्नम् अभवत् I अमेरिकादेशे शिकागोनगरे अखिल विश्व धार्मिक-सम्मेलने भाषणं कृत्वा अयं महापुरुषः प्रसिद्धि प्राप्तवान् I अयं युगपुरुषः सम्पूर्ण विश्वे प्रातः स्मरणीयः अस्ति I

**4. महात्मा बुद्धः** भारतवर्षे कपिलवस्तु नगरे राजपरिवारे अस्य जन्म अभवत् I अस्य नाम 'सिद्धार्थः ' आसीत्I पिता शुद्धोधनः आसीत् माता च मायादेवी I बाल्याकालात् एव सः गम्भीर विरक्तमनः दयालुः च आसीत् I अस्य विवाहः 'यशोधरा' नाम कन्यया सह अभवत् I 'राहुलः ' तस्य पुत्रः आसीत् I एकदा रात्रौ सः सर्वम् त्यक्त्वा गृहात् निर्गतः I स्थानात् स्थानं भ्रमन् सः बोधगयाम् अगच्छत् I तत्रैव सः वटमूले तपः अकरोत् महाबोधं च अलभत् I अत एव सः 'बुद्धः' इति नाम्ना विख्यातः अभवत् I तेन बौद्धधर्मस्य प्रचारः प्रसारः च कृतः I

**5. स्वामी दयानन्दः** भारतस्य प्रमुखः समाज सुधारकः स्वामी दयानन्दः आसीत् I तस्य जन्म भारतस्य गुजरातप्रदेशे 1824 तमे वर्षे फरवरी मासस्य 12 दिनांके अभवत् I अध्यात्मविषये तस्य विशेषरुचिः आसीत् I सः आर्यसमाजस्य स्थापना अकरोत् I सः वैदिक शिक्षायाः प्रचाराय प्रसाराय च कार्यम् अकरोत् I अस्पृश्यता जातिभेदः इत्यादीनां सामाजिक दोषाणाम् सः तीव्रं विरोधं अकरोत् I 'सत्यार्थ प्रकाश' इति तेन लिखितः महत्वपूर्णः ग्रन्थः प्रसिद्धः अस्ति I

**४. "वसुधैव कुटुम्बकम्" इति विषये एकां भाषणप्रतियोगिताम् आयोजयन्तु I**

**उत्तरम्:** 'वसुधैव कुटुम्बकम्': सृष्टेः स्त्रष्टा ईश्वरः एकः एव अस्ति I संसारस्य सर्वे प्राणिनः ईश्वरस्य सन्ततिः I अतः सम्पूर्णे विश्वे स्थिताः जनाः रूप-वर्ण- भाषा-संस्कृति-भेदान् धारयन्तः अपि ते सर्वे समानाः एव सन्तिI अतः श्रेष्ठः जनः सर्वप्राणिषु समानं व्यवहारं करोति, सर्वे स्निह्यति ते कमपि न पीडयति I भारतीयाः एतदर्थम् कथयन्ति I 'सर्वे भवन्तु सुखिनः ' सर्वे सन्तु निरामयाः I सर्वे भद्राणि पश्यन्तु मा कश्चित् दुःखभाग् भवेत्I अस्माकम् कृते तु वसुधैव कुटुम्बकम् इव अस्ति I

Get More Learning Materials Here : CLICK HERE www.studentbro.in

**पठित-अवबोधनम्|**

**१. अधोलिखितश्लोकं पठित्वा प्रश्नानाम् उत्तरत-**

उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः ।
न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः ।।

**प्रश्नाः-**

**I. एकपदेन उत्तरत-**

**प्रश्न i. के मुखे न प्रविशन्ति ?**
**उत्तरम्:** मृगाः

**प्रश्न ii. उद्यमेन कानि सिध्यन्ति ?**
**उत्तरम्:** कार्याणि

**प्रश्न iii. मनोरथैः कानि न सिध्यन्ति ?**
**उत्तरम्:** कार्याणि

**प्रश्न iv. कार्याणि केन सिध्यन्ति ?**
**उत्तरम्:** उद्यमेन

**II. पूर्णवाक्येन उत्तरत-**

**(i) मृगाः कस्य मुखे न प्रविशन्ति ?**
**उत्तरम्:** मृगाः सुप्तस्य सिंहस्य मुखे न प्रविशन्ति ।

**III. निर्देशानुसारं उत्तरत-**

**(i) 'मनोरथैः' इति पदे का विभक्तिः ?**
(क) द्वितीया
(ग) षष्ठी
(ख) तृतीया

Get More Learning Materials Here : CLICK HERE www.studentbro.in

(घ) सप्तमी

**उत्तरम्:** (ख) तृतीया

**(ii) प्रविशन्ति ' अत्र कः लकारः ?**

(क) लृट्

(ख) लट्

(ग) लङ्

(घ) लोट्

**उत्तरम्:** (क) लृट्

**२. निम्नलिखितश्लोकस्य अन्वयं मञ्जूषातः समुचितं पदं चित्वा पूरयत-**

श्लोक – विद्या ददाति विनयं विनयाद्याति पात्रताम्।
पात्रत्वाद्धनमाप्नोति धनाद्धर्मः ततः सुखम् ।।

**मञ्जूषा – धर्मः, विनयं धनम्,**

**अन्वयः – विद्या ........(i)......... ददाति विनयात् ......... (ii)...... याति पात्रत्वात् .......(iii)....... आप्नोति, धनात् ......(iv)....... ततः सुखम्।**

**उत्तरम्:** (i) विनयं

(iii) धनम्

(ii) पात्रताम्

(iv) धर्मः

**३. रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत-**

**(i) लङ्का <u>स्वर्णमयी</u> आसीत्।**

**उत्तरम्:** लङ्का कीदृशी आसीत्?

**(ii) <u>अभिवादनशीलस्य</u> चत्वारि वर्धन्ते ।**

**उत्तरम्:** कस्य चत्वारि वर्धन्ते ?

**(iii) <u>देवः</u> सहायक : भवति ।**

**उत्तरम्:** कः सहायक : भवति ?

Get More Learning Materials Here : CLICK HERE www.studentbro.in

**(iv) <u>विद्या</u> विनयं ददाति ।**

**उत्तरम्:** का विनयं ददाति ?

**(v) पात्रत्वात् <u>धनम्</u> आप्नोति ।**

**उत्तरम्:** पात्रत्वाद् किम् आप्नोति ? दैः सह मेलयत-

**४. पर्यायपदैः**

**उत्तरम्:**

Get More Learning Materials Here : CLICK HERE www.studentbro.in